http://www.sgbauonline.com/



# M.A. (Part—I) Sanskrit (Semester—II) Examination

## SANSKRIT

## Paper—8

## (Literature & Aesthetics)

Time : Three Hours] [Maximum Marks : 80

सूचना : निर्देशाभावे उत्तराणि स्वीकृतभाषयैव लिखत।

(शुकनासोपदेश:)

1. (अ) एकस्य प्रश्नस्य उत्तरं विस्तरेण लिखत : 10

(1) 'गद्यकवीनां निकषं वदन्ति।' इत्येषाम् उक्तिम् शुकनासोपदेशस्य आधारेण स्पष्टीकुरुत।

(2) शुकनासोपदेशस्य सारं लिखत।

(ब) टिप्पण्यौ लिखत : 6

(1) विरहविनोदचिह्नानि।

(2) लक्ष्म्या: परस्परविरुद्धचरितम्।

(3) गुरूपदेश:।

(4) शुकनासोपदेशस्य प्रयोजनम्।

2. (अ) द्वयो: वाक्ययो: ससन्दर्भस्पष्टीकरणं कुरुत : 10

(1) अपरिणामोपशमो दारूणो लक्ष्मीमद:।

(2) भवादृशा एव भवन्ति भाजनान्युपदेशानाम्।

(3) प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानले वारिणा।

(4) राजान: सर्वाविनयाधिष्ठानताञ्च गच्छन्ति।

(ब) एकस्य गद्यांशस्य अनुवादं लिखत : 6

(1) नह्येवंविधमपरिचितमिह जगति किञ्चिदस्ति, यथेयमनार्य्या। लब्धापि खलु दु:खेन परिपाल्यते। दृढगुणसन्दाननिष्पन्दीकृतापि नश्यति। उद्दामदर्प-भटसहस्रोल्लासितासिलता-पञ्जर-विधृताप्यप-क्रामति। मदजल-दुर्दिनान्धकारगजघटित-घन-घटा-परिपालितापि प्रपलायते, न परिचयं रक्षति, नाभिजनमीक्षते।

(2) यौवनारम्भे च प्राय: शास्त्रजलप्रक्षालननिर्म्मलापि कालुष्यमुपयाति बुद्धि:। अनुज्झितधवलतापि सरागेव भवति यूनां दृष्टि:। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृति:। इन्द्रियहरिणहारिणी च सततदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मन: च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनस:।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(काव्यप्रकाशः)

3. (अ) श्लोकद्वयस्य सविवरणमनुवादं कुरुत : 10

(1) नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधति भारती कवेर्जयति ।।

(2) तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ।
इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ।

(3) ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ।।

(4) स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा
मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।
भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ।।

(ब) 'त्रयः समुदिताः हेतुर्न तु हेतवः ।' इत्येतत् वाक्यं स्पष्टीकुरुत । 6

अथवा

काव्यप्रयोजनानि लिखत ।

(नाट्यशास्त्रम्)

4. (अ) टिप्पणी लिखत : 10

(1) पञ्चमवेदः

(2) भरतस्य पुत्राः

(3) विरूपाक्षः

(4) नान्दी ।

(ब) इन्द्रध्वजमहोत्सवप्रसङ्गे कृतस्य नाट्यप्रयोगस्य वर्णनं कुरुत । 6

अथवा

नाट्यवृत्तीनां महत्त्वं विशदीकुरुत ।

5. सुयोग्यं पर्यायं विचिनुत (केऽपि षोडश) : 16

(1) अलकारसम्प्रदायस्य प्रवर्तकः आचार्यः कः ?

(अ) वामनः (ब) दण्डी

(क) भामहः (ड) भरतः

(2) आचार्यभामहस्य निवासस्थानम् अस्ति :

(अ) काश्मीरनगरम् (ब) वाराणसी

(क) केरलप्रदेशः (ड) बंगालप्रान्तः



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(3) कस्य मते वक्रोक्तिस्तु अलङ्कारः एवास्ति ?

(अ) रुद्रटस्य (ब) जगन्नाथस्य

(क) कुन्तकस्य (ड) विश्वनाथस्य

(4) अधोलिखितेषु रसः कः ?

(अ) हास्यः (ब) शोकः

(क) क्रोधः (ड) विस्मयः

(5) अर्वाचीनरसः कः ?

(अ) करूणः (ब) शान्तः

(क) वीरः (ड) शृङ्गारः

(6) रतिः कस्य स्थायिभवः ?

(अ) करूणस्य (ब) वीररय

(क) रौद्रस्य (ड) शृङ्गारस्य

(7) इष्टनाशादिभिश्चेतो वैकल्यं :

(अ) जुगुप्सा (ब) शोकः

(क) भयम् (ड) विस्मयः

(8) यमः कस्य रसस्य देवता ?

(अ) शृङ्गारस्य (ब) वीरस्य

(क) करूणस्य (ड) शान्तस्य

(9) अद्भूतरसस्य स्थायिभावः कः ?

(अ) रामः (ब) उत्साहः

(क) विस्मयः (ड) रतिः

(10) कार्यारम्भेषु संरम्भः

(अ) क्रोधः (ब) उत्साहः

(क) रतिः (ड) जुगुप्सा

(11) वाचां शब्दार्थवक्रोक्तिरलंकाराय कल्पते। इति कस्य मतम् ?

(अ) भामहस्य (ब) भरतमुनेः

(क) मम्मटस्य (ड) आनंदवर्धनस्य

(12) कथायाः स्वभिनीतता इत्येषा उक्तिः भामहेन किमर्थं योजिता ?

(अ) रसप्रतिपादनार्थं (ब) वक्रोक्तिप्रतिपादनार्थं

(क) सहृदयत्वप्रतिपादनार्थं (ड) भाविकत्वप्रतिपादनार्थं



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(13) वक्रोक्तिजीवितम् । इत्येषा कस्य शास्त्रकृतिः ?

(अ) भामहस्य (ब) रुद्रटस्य

(क) क्षेमेन्द्रस्य (ड) कुन्तकस्य

(14) ध्वन्यालोकस्था प्रबंधव्यंजकता कया सह तुल्या वक्रोक्तिजीविते ?

(अ) वस्तुवक्रतया (ब) वाक्यवक्रतया

(क) प्रबंधवक्रतया (ड) पदपूर्वार्धवक्रतया

(15) अभिनवगुप्तस्य समकालीनः कः ?

(अ) क्षेमेन्द्रः (ब) दण्डी

(क) कुन्तकः (ड) राजशेखरः

(16) काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते । इत्येषा उक्तिः कुत्र उपलभ्यते ?

(अ) काव्यालङ्कारसङ्ग्रहे (ब) काव्यादर्शे

(क) नाट्यशास्त्रे (ड) वक्रोक्तिजीविते

(17) भामहस्य विरोधकाः के ?

(अ) अभाववादिनः (ब) ध्वनिवादिनः

(क) सौशब्दवादिनः (ड) न केऽपि

(18) भामहविवरणम् केन रचितम् ?

(अ) उद्भटेन (ब) रुद्रटेन

(क) जगन्नाथेन (ड) दण्डिना

(19) वास्तवमौपम्यमतिशयः श्लेषः इत्येतादृशम् अलङ्काराणां वर्गीकरणं केन कृतम् ?

(अ) मम्मटेन (ब) दण्डिना

(क) उद्भटेन (ड) रुद्रटेन

(20) निरीहावस्थायां स्वात्मविश्रामजं सुखम् किम् ?

(अ) शोकः (ब) शमः

(क) रतिः (ड) विस्मयः



http://www.sgbauonline.com/